एवरशाइन

echo series

# संस्कृत ज्ञान प्रकाशिका

## तृतीयो भागः


लेखक
डॉ छविकृष्ण आर्य
एम.ए., बी.एड., एम. फिल., पी.एच.डी. साहित्याचार्य
(प्राचार्य)
केन्द्रीय विद्यालय, ए. एफ. II
जामनगर (गुजरात)

सह-लेखिका
श्रीमती गीता आर्या
एम.ए. बी.एड
टी.जी.टी. (संस्कृत)
डी.ए.वी. पब्लिक स्कूल, बवाना,
नई दिल्ली

सम्पादकः
श्री किशोर कुमार झा
व्याकरणाचार्य, बी.एड.
टी.जी.टी. (संस्कृत)
केन्द्रीय विद्यालय, टैगोर गार्डन,
नई दिल्ली - 110027



EVERSHINE ESP PUBLISHERS
SONI HOUSE, WZ-348, Nangal Raya, New Delhi-110046
Phone : 28111758, 28113958, Fax : 28112353
E-Mail : evershinepub@gmail.com

इस पुस्तक का कोई भी अंश या चित्र किसी भी प्रकार से उद्धृत करना सर्वथा वर्जित है।
इस पुस्तक की कुंजी, गाइड अथवा किसी भी प्रकार की सहायक-पुस्तिका छापना वर्जित है।

प्रकाशक

**एवरशाइन पब्लिशर्ज़**

सोनी हाऊस WZ - 348, नॉगल राया, नई दिल्ली - 110046

फोन नं. - 28111758, 28113958, फैक्स : 28112353

©सर्वाधिकार सुरक्षित

डिजाइन एवं टाइप सैटिंग

जैन कंप्यूटर्स

# पुरोवाक्

संस्कृतभाषा विश्वस्य प्राचीनतमा समृद्धा सरला सरसा च भाषा विद्यते। एषा सर्वासां भाषाणां जननी स्वीक्रियते। अस्यां भाषायां वेदादिग्रंथा विद्यन्ते। वर्तमान-कम्प्यूटर युगेऽपि एषा एव भाषा सर्वाधिका उपयुक्ता भाषा मन्यते। इयं भाषा न केवलं सर्वाषां भाषाणाम् आधारः अपितु तत्र नैतिकानां मूल्यानां वृहत्कोषः अस्ति। अस्यामेव भाषायां भारतीयसंस्कृतेः मूलं विद्यते। संस्कृतस्य प्रचारेण प्रसारेण च सर्वभाषाणां कल्याणं भवति, भारतीय-संस्कृतेश्च परिचयः जनाः लप्स्यन्ते। यद्यपि संस्कृतस्य बहूनि पुस्तकानि माध्यमिककक्षाणां कृते पूर्वतः एव विद्यन्ते, पुनश्च भाषायाः चतुर्विध-श्रवण-भाषण-पठन-लेखनकौशलानां विकासः स्यात् इति चेतसि अवधार्य नूतनः प्रयासः मया कृतः। 'प्रवेशिका' भागेन संस्कृतस्य व्यावहारिकत्वमाश्रित्य येषां वस्तूनां प्रयोगः दैनिके जीवने भवति, तेषां सर्वेषां वस्तूनां संस्कृतशब्दानां परिचयः चित्रमाध्यमेन मया प्रदत्तः येन छात्राः सुगमतया अवगच्छेयुः । संस्कृत-ज्ञान प्रकाशिकायाः अवशिष्टेषु त्रिषु भागेषु गद्य-पद्य-नाटकादि तिसृणां विधानां प्रयोग माध्यमेन संस्कृत भाषायाः अवबोधः सहजतया भवेदिति प्रयासः विहितः । अभ्यास कार्यम् नवमी दशमी कक्षायाः प्रष्टव्य-प्रश्नान् चेतसि-अवधार्य प्रदत्तम्, येन छात्राः माध्यमिक कक्षायां संस्कृत विषये अपेक्षितान् अङ्कान् प्राप्नुयुः । संस्कृत भाषायाः अधिकाधिकः प्रचारश्च भवेत् । अस्य पुस्तकस्य प्रकाशनभारः एवरशाइन प्रकाशनेन वोढः। यद्यपि कृते प्रयत्नेऽपि त्रुटयः सम्भाव्याः सन्ति तथापि सहृदय-शिक्षकवर्यैः पुस्तकमिदं स्वीकृतं भविष्यति तथा संस्कृतमाध्यमेन संस्कृतशिक्षणे सहायकं भविष्यतीति कामये। केन्द्रीय-माध्यमिक-शिक्षा-परिषदः पद्धतिमाधृत्य आदर्शप्रश्नपत्रम् अपि पुस्तकान्ते शिक्षकाणां छात्राणां च सौकर्यार्थं प्रदत्तम्। अस्मिन् सारस्वतानुष्ठाने संस्कृतजगतः लब्धप्रतिष्ठस्य विद्वद्वरेण्यस्य श्री ओम्प्रकाशठाकुरमहोदयस्य विशिष्टसहयोगस्य कृते कृतज्ञतां ज्ञापयामि ।

भावत्कः

विदुषामनुचरः

छविकृष्ण आर्यः

प्राचार्यः

# विषय सूची


| क्र० सं० | अध्यायाः पाठ्य बिन्दवः च | पृष्ठ संख्या |
|---|---|---|
| | मङ्गलाचरणम् | 5 |
| 1. | अभ्यासः परमो गुरुः (नीतिकथामकरन्दतः संकलितः) | 6-9 |
| 2. | सुभाषितानि | 10-12 |
| 3. | देशहितं मम करणीयम् ('संगमनीतः' संकलितः) | 13-16 |
| 4. | त्याज्यं न धैर्यम् (नीतिकथामकरन्दतः) | 17-20 |
| 5. | नीति-श्लोकाः | 21-24 |
| 6. | दया निरीहे कर्तव्या (तेनालीकथा कौतुकात्) | 25-28 |
| 7. | संस्कृतिः ('संस्कृतिः' पत्रिकातः संकलनम्) | 29-31 |
| 8. | लुब्धस्य नश्यति सुखम् | 32-35 |
| 9. | सङ्घे शक्तिः (लङ्लकारक्रियापदानां प्रयोगः) | 36-40 |
| 10. | संस्कृत-गीतम् (काव्यावलितः) | 41-44 |
| 11. | वर्तमाने रमस्व | 45-48 |
| 12. | सुतरां विभाति मिजोरमः | 49-52 |
| 13. | दिल्लीमहानगरस्य जीवनम् | 53-56 |
| 14. | परिश्रमस्य महत्त्वम् | 57-59 |
| 15. | अहिंसायाः उपासकः | 60-62 |
| 16. | वैज्ञानिकं प्रदूषणम् | 63-66 |
| 17. | गीताशास्त्रे कर्मयोगः | 68-71 |
| 18. | अस्माकं देशः | 72-75 |
| 19. | पर्यावरणम् | 76-78 |
| | व्याकरणम् | 79-88 |
| | आदर्श प्रश्नपत्रम् | 89-96 |

# मङ्गलाचरणम्



(1) यस्य भूमिः प्रमान्तरिक्षमुतोदरम् ।
दिवं यश्चक्रे मूर्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।

भूमि जिसके पैरों के समान तथा अन्तरिक्ष पेट के समान, जिसने द्युलोक को सिर समान बनाया है, उस सबसे बड़े ब्रह्म को मेरा नमस्कार है ।

(2) वयं त्वां स्मरामो वयं त्वां भजामो
वयं त्वां जगत्साक्षिरूपं नमामः ।
सदेकं निधानं निरालम्वमीशम्
भवाम्भोधिपोतं शरण्यं व्रजामः ।।

हे प्रभो ! हम सब आपका स्मरण करते हैं, हम सब आपका भजन करते हैं, हम आपके जगत् के निर्माता स्वरूप को प्रणाम करते हैं । आप एक मात्र सत्स्वरूप हो, सब जगत् के भण्डार (खजाना) हो, आप सर्वाधार परमेश्वर हो, आप संसार सागर को पार करने के लिए एक मात्र नौका हो, हम आपकी शरण को प्राप्त करना चाहते हैं ।

(3) वशे यस्य विश्वं समस्तं सदाऽऽस्ते
यदाभासतो भाति यद्वै विचित्रम् ।
न जानन्ति यं तत्त्वतो योगिनोऽपि
चिदानन्दरूपं तमीशं प्रपद्ये ।।


यह सारा संसार जिसके वश में है, जिसके प्रकाश से यह विचित्र जगत् प्रकाशित है । योगीजन भी जिसके वास्तविक रूप को नहीं जानते हैं । मैं उस ज्ञान एवं आनन्द स्वरूप प्रभु को प्राप्त करूँ ।

प्रथमः पाठः

# अभ्यासः परमो गुरुः

(नीतिकथामकरन्दतः संकलितः)

बंगप्रदेशे बोपदेव नामधेयः एकः मन्दमतिः छात्रः अवसत् । सः यत् पठति तद् विस्मरति । परीक्षासु सफलतां न प्राप्नोति स्म । तस्य सहपाठिनः तम् उपहसन्ति स्म । केचन शिक्षकाः अपि तं मूर्खं मत्त्वा तिरस्कुर्वन्ति स्म ।



एकदा गुरुजनेन तिरस्कृतः असौ विद्यालयात् निष्क्रान्तः । आत्मग्लानिपीडितः सः मार्गे अचिन्तयत् – 'नूनम् अहम् मूर्खः अस्मि', अत एव सर्वे माम् उपहसन्ति । मम भाग्ये विद्या नास्ति । सम्प्रति पठनं परिहाय किं करिष्यामि ? इति चिन्तयन् यत्र तत्र निरुद्देश्यं भ्रमति स्म ।

मार्गे तेनैकः कूपः दृष्टः । तत्र काश्चन नार्यः स्व घटान् जलेन पूरयन्ति स्म । सोऽपि औत्सुक्यात् तत्र स्थितः । रज्ज्वा कूपात् जलनिष्कासनक्रियाम् उत्सुको भूत्वा व्यलोकयत् ।

अत्रान्तरे एका ललना जलेन घटं सम्पूर्य तम् उत्त्थापितवती । बोपदेवः विस्मितो भूत्वा पश्यति यत् यस्मिन् शिलाखण्डे घटः निहितः आसीत्, तत्र एकः गर्तः वर्तते । सः तां स्त्रियम् अपृच्छत् – मातः ! इमं गर्तं कः निर्मितवान् ? सा विहस्य प्रत्यवदत् – 'एषः गर्तः प्रतिदिनं घटस्थापनेन निर्मितः अभवत्' । इत्युक्त्वा सा घटम्

आदाय प्रचलिता ।

बोपदेवः तद्वचः निशम्य विचारमग्नः जातः । यदि भूयो भूयः मृण्मयस्य घटस्य स्थापनेन पाषाणे गर्तः सम्पद्यते, तदा पुनः पुनः पठनेन मम मतिः कथं तीव्रा न भवेत् ? इति विचार्य स पुनः विद्यालये प्रवेशम् अलभत ।

पुनः पुनः अभ्यासेन बोपदेवः परीक्षासु सफलतां लब्धवान् । गुरूणां सहपाठिनां च स्नेहभाजनमपि अभवत् । तस्यैव बोपदेवस्य कालान्तरे पण्डितप्रवरेषु गणना अभवत् ।

**शब्दार्थाः**

नामधेयः = नाम का, मन्दमतिः = मन्दबुद्धि, विस्मरति = भूल जाता है, प्राप्नोति स्म = प्राप्त करता था, उपहसन्ति स्म = मजाक उड़ाते थे, केचन = कुछ, तिरस्कुर्वन्ति स्म = तिरस्कार करते थे (अपमान करते थे), निष्क्रान्तः = निकल गया, आत्मग्लानिपीडितः = अन्तर्दुःख से पीड़ित, सम्प्रति = इस समय (अब), परिहाय = छोड़कर, कूपः = कुँआ, औत्सुक्यात् = उत्सुकतावश, रज्ज्वा = रस्सी से, जनलिष्कासनक्रियाम् = पानी निकालने की क्रिया को, व्यलोकयत् = देखा, अत्रान्तरे = इसके बाद, ललना = स्त्री, सम्पूर्य = भरकर, उत्त्थापितवती = उठाया, विस्मितो भूत्वा = आश्चर्यचकित होकर, गर्तः = गढ्ढा, विहस्य = हँसकर, आदाय = लेकर, निशम्य = सुनकर, मृण्मयस्य = मिट्टी से बने (का), गणना = गिनती ।

## अभ्यास कार्यम्

**प्र. 1. एकपदेन उत्तरत –**

(i) बोपदेव नामधेयः छात्रः कुत्र अवसत् ? ____________

(ii) बोपदेवः कासु सफलतां न प्राप्नोति स्म ? ____________

(iii) केन तिरस्कृतः असौ विद्यालयात् निष्क्रान्तः ? ____________

(iv) मार्गे तेन किं दृष्टम् ? ____________

(v) ललना जलेन कम् सम्पूर्य उत्त्थापितवती ? ____________

(vi) बोपदेवः किम् निशम्य विचारमग्नः जातः ? ____________

(vii) कालान्तरे बोपदेवस्य केषु गणना जाता ? ____________

**प्र. 2. पूर्ण वाक्येन उत्तरत –**

(i) आत्मग्लानि-पीडितः सः मार्गे किम् अचिन्तयत् ?

____________

(ii) कूपे काश्चन नार्यः किं कुर्वन्ति स्म ?

____________

(iii) बोपदेवः विस्मितो भूत्वा किं पश्यति ?

______________________________

(iv) बोपदेवः गर्तं दृष्ट्वा तां स्त्रियं किम् अपृच्छत् ?

______________________________

(v) सा विहस्य किम् अवदत् ?

______________________________

(vi) बोपदेवः विचारमग्नो भूत्वा किम् निर्णीतवान् ?

______________________________

(vii) बोपदेवः परीक्षासु कथं सफलतां लब्धवान् ?

______________________________

**प्र. 3. अधः पाठे प्रयुक्तानि 'क्त्वा' एवं 'ल्यप्' प्रत्ययान्तानि पदानि दत्तानि । पाठस्य सहायतया तेषां वाक्येषु प्रयोगं कुरुत –**

मत्त्वा = ______________________________

भूत्वा = ______________________________

सम्पूर्य = ______________________________

आदाय = ______________________________

निशम्य = ______________________________

विहस्य = ______________________________

परिहाय = ______________________________

**प्र. 4. अधः कानिचित् विशेषण-विशेष्य पदानि दत्तानि तानि यथाभावं योजयित्वा पुनः लिखत –**

| विशेषणम् – | विशेष्यम् |
| --- | --- |
| मन्दमतिः | ललना |
| केचन | छात्रः |
| एकः | घटस्य |
| एका | शिक्षकाः |
| काश्चन | कूपः |
| मृण्मयस्य | नार्यः |

| विशेषण पदानि | विशेष्य पदानि |
| --- | --- |
| ______________ | ______________ |
| ______________ | ______________ |

________________ ________________

________________ ________________

________________ ________________

________________ ________________

**प्र. 5.** अधः क्रियापदानि दत्तानि तेषां कर्तृपदानि पाठात् चित्वा रिक्तस्थानेषु पूरयत –

| कर्तृ पदानि | क्रिया पदानि |
|---|---|
| ________________ | उपहसन्ति |
| ________________ | अस्मि |
| ________________ | उत्त्थापितवती |
| ________________ | प्रचलिता |
| ________________ | लब्धवान् |
| ________________ | अलभत |

**प्र. 6.** रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत –

(i) सः यत् पठति तद् विस्मरति ।

(ii) गुरुजनेन तिरस्कृतः असौ विद्यालयात् निष्क्रान्तः ।

(iii) सः मार्गे अचिन्तयत् ।

(iv) नार्यः स्वघटान् जलेन पूरयन्ति स्म ।

(v) बोपदेवः अभ्यासेन परीक्षासु सफलतां लब्धवान् ।

**प्र. 7.** अधः प्रयुक्तवाक्येषु रेखाङ्कितस्य पदस्य त्रयः भावाः लिखिताः, तेषु उचितं भावम् अवबुध्य (✓) इति चिह्नेन अङ्कयत –

(i) तस्य सहपाठिनः तम् उपहसन्ति स्म ।

(क) सहकर्मिणः (ख) सहाध्यायिनः (ग) सहभागिनः ।

(ii) गुरुजनेन तिरस्कृतः असौ विद्यालयात् निष्क्रान्तः ।

(क) सम्मानितः (ख) पुरस्कृतः (ग) अपमानितः ।

(iii) तद्वचः निशम्य विचारमग्नः जातः ।

(क) विचार्य (ख) श्रुत्वा (ग) आदाय ।